# संस्कृतवार्ता:

दिनाङ्क : 03/07/2025 सायम् : 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य मध्याह्ने घानादेशस्य संसदं सम्बोधितवान्, भारतं घाना च व्यापक-सहयोग-रूपेण स्वसम्बन्धस्य उन्नतीकरणाय सहमतौ जातौ।
- विदेशमन्त्री सुब्रह्मण्यमजयशङ्करः आतङ्कवादविषये भारतस्य समर्थनं न करणाय पाश्चात्त्यदेशानामुपरि प्रश्नं कृतवान्, सः आतङ्कवादस्य निवारणे अधिकाधिक-एकीकृतवैश्विकसहकार्यस्य अवश्यकतायाः उपरि बलं दत्तवान्।
- केन्द्रेण अनेकेषां पाकिस्तानी-अभिनेतॄणां क्रिकेट्-क्रीडकानां च सोशियल्-मीडिया-अकाउण्ट्स् इति सामाजिक-माध्यम-पुटकानां पुनः प्रतिबन्धः कृतः।
- हिमाचलप्रदेशे विगत-द्वादश-दिनेषु अतिवृष्टि-सम्बद्धासु घटनासु त्रिषष्टि-जनाः मृताः, भारतीय ऋतुविज्ञानविभागेन हिमाचलप्रदेशेस्य षट्-मण्डलेषु प्रवाह्-संभावना प्रकटिता अस्ति।
- क्रिकेट्-क्रीडायां बर्मिन्घम्-नगरे एजबेस्टन् क्रीडाङ्गणे एण्डरसन्-तेंदुलकर-ट्रॉफीति टेस्ट क्रीडायाः द्वितीय-स्पर्धायाः द्वितीयदिने इङ्ग्लैण्ड-विरुद्धं प्रथम-चक्रे अन्तिमसूचनापर्यन्तं भारतेन षट्-स्तोभकानां हानि-पुरस्परं एकोनविंशत्यधिक-चतुःशत-धावनाङ्काः समार्जिताः ।

---

<u>प्रधानमन्त्री-घाना</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी घानादेशस्य संसदं सम्बोधयन् अवदत् यत् घानादेशः लोकतन्त्रस्य भावनां विकीर्णां करोति, यत्र हि, घानादेशे भवितुं, सम्माननीयं संसदं च सम्बोधयितुं सः अतीव गौरवम् अनुभवति । प्रधानमन्त्री अवदत् यत् विश्वस्य बृहत्तमस्य लोकतन्त्रस्य प्रतिनिधित्वेन सः एक-दशमलव-चत्वारि शतकोटि-भारतीयानां सद्भावनाम् अभिवादनं च स्वेन सह समानयत्।

सः अवदत्, घानादेशः न केवलं तस्य मृत्तिकायां सुवर्णः अस्तीति, सुवर्णभूमिः इति प्रसिद्धः, अपि तु तस्य जनानां तेज,सः बलस्य च कारणेन सः सुवर्णभूमिः कथ्यते।

ततः पूर्वं प्रधानमन्त्री मोदी, अथ घानादेशस्य राष्ट्रपतिः जॉन् द्रमणिमहामा च प्रतिनिधिमण्डलस्तरस्य वार्तां कृतवन्तौ, ततः राष्ट्रद्वयं व्यापक-सहयोग-रूपेण स्वसम्बन्धस्य उन्नतीकरणाय सहमतम् अभवत्। तयोर्मध्ये व्यापार, निवेश, कृषिक्षेत्र, डिजिटलप्रौद्योगिकी, क्षमतानिर्माण, आधारभूतसंरचना, जनसम्बन्धादिषु क्षेत्रेषु सहकार-विस्तारस्य विषये चर्चा अभवत्। द्वयोः देशयोः मध्ये संस्कृति-मानक-आयुर्वेद-पारम्परिकचिकित्सा-क्षेत्रेषु चत्वारि सन्धि-पत्राणि, संयुक्त-आयोग-तन्त्रविषये च हस्ताक्षराणि कृतानि। उभौ नेतारौ घानादेशे वर्धमानस्य द्विपक्षीयव्यापारस्य भारतीयनिवेशस्य च स्वागतं कृतवन्तौ, रक्षासुरक्षासहकार्यस्य विषये अपि उक्तवन्तौ।

इत: परं श्रीमोदी स्वस्य यात्रायाः द्वितीये चरणे त्रिनिदाद्-टोबैगो-देशं प्रति प्रस्थितवान्। प्रधानमन्त्रित्वेन अस्य देशस्य तस्य प्रथमा यात्रा भविष्यति, नवनवत्यधिक-ऊनविंशतितम वर्षात् परं प्रधानमन्त्रिस्तरस्य प्रथमा द्विपक्षीययात्रा च भविष्यति।

---------------------------------------

**विदेशमन्त्री-आतङ्कवादः**

विदेशमन्त्री सुब्रह्मण्यमजयशङ्करः आतङ्कवादविषये भारतस्य समर्थनं न करणाय पाश्चात्त्यदेशानामुपरि प्रश्नं कृतवान्, सः आतङ्कवादस्य निवारणे अधिकाधिकं एकीकृतवैश्विकसहकार्यस्य अवश्यकतायाः उपरि बलं दत्तवान्। अमेरिकादेशस्य वाशिङ्गटननगरे वार्ताहराणां प्रश्नानां प्रतिक्रियारूपेण डॉ. जयशङ्करः अवदत् यत्

प्रायः एते देशाः आतङ्कवादेन पीडितानां देशानाम् कृते समर्थनं न दास्यन्ति यावत् ते स्वयमेव तस्य दुष्प्रभावग्रस्ताः न भवन्ति।

सः अवदत् यत् अस्मिन् अवसरे भारतस्य स्थितिः अधिकदृढा, सिद्धान्तगता च अभवत्। डॉ. जयशङ्करः प्रोक्तवान् यत् सदैव भारतेन अन्यदेशेभ्यः आतङ्की-आक्रमणस्य विरुद्धमेव समर्थनं प्रदत्तम्। भारत-पाकिस्तानयोः युद्धविरामविषये अमेरिकीराष्ट्रपति-डोनाल्ड-ट्रम्पस्य वक्तव्ये डॉ. जयशङ्करः अवदत् यत् तस्मिन् समये यत् घटितं तस्य अभिलेखः अतीव स्पष्टः अस्ति तथा च अस्य युद्धविरामस्य विषये द्वयोः देशयोः सैन्यसञ्चालन-महानिदेशकानां मध्ये वार्ता अभवत्।

----------------------------------------

**सर्वकारः- प्रतिबन्धः**

केन्द्रेण अनेकेषां पाकिस्तानी-अभिनेतॄणां क्रिकेट्-क्रीडकानां च सोशियल्-मीडिया-अकाउण्ट्स् इति सामाजिक-माध्यम-पुटकानां पुनः प्रतिबन्धः कृतः। सूत्रानुसारं तान्त्रिककारणात् कञ्चित् कालपर्यन्तं एतानि पुटकानि उद्घाटितानि आसन्। अवधेयं यत्-अस्मिन् वर्षे मे-मासे भारतविरोधी-प्रचारकारणेन, अवांछितसामग्रीणां च प्रसारार्थं बहूनां पाकिस्तानी-यूट्यूब-चैनेल्-सोशल-मीडिया-अकाउण्ट्स् इत्येतेषां प्रतिषेधः कृतः आसीत् । एतेषु अभिनेता सबा कमर, अहाद रजा मीर, युमना जैदी, अथ, दानिश तैमूर, इत्येतेषाम् इंस्टाग्राम अकाउंटस् तथा च क्रिकेट-क्रीडकाभ्यां शाहिद अफरीदी एवं शोएब अख्तर इत्याभ्यां यू-ट्यूब चैनल इति सम्मिलितानि सन्ति। सर्वाणि पाकिस्तानी-ओटीटी प्लेटफॉर्म, मीडिया स्ट्रीमिंग सेवाः, पाकिस्तानी वेब सीरीज, गीतानि, चलच्चित्राणि, पोडकॉस्ट तथा अन्य-माध्यम-सामग्रीणां प्रतिषेधार्थं निर्देशः प्रदत्तः वर्तते ।

----------------------------------------

**एचपी-भूस्खलन-प्रचण्डवृष्टिः**

प्रचण्डवृष्ट्या, मेघविस्फोटेन, आकस्मिकजलप्रलयेन, भूस्खलनेन च सम्पूर्णे हिमाचलप्रदेशे सामान्यजीवनं भृशं बाधितं जातम्। जूनमासस्य विंशति-दिनाङ्कात् आरभ्य अतिवृष्टि-सम्बद्धासु घटनासु त्रिषष्टि-जनाः मृताः, शताधिकजनाः व्रणिताः, चत्वारिंशत् जनाः अद्यावधि लुप्ताः सन्ति इति सूचना वर्तते। अद्य श्वः च राज्ये केषुचित् स्थानेषु अत्यधिकवृष्टिः भविष्यति इति ऋतुविभागेन पीतसंचेतना प्रकटिता अस्ति।

-----------------------------------------

<u>भारतस्य ऋतु विभागः</u>

भारतीय-ऋतु-विज्ञान-विभागेन अनुमानितं यत् - अरुणाचलप्रदेशः, पूर्वमध्यप्रदेशः, गुजरातम्, हिमाचलप्रदेशः, नागालैण्डः, मणिपुम्, मिजोरमः, त्रिपुरा आदिराज्याणां पृथक्-पृथक्स्थानेषु अद्य प्रचण्डवृष्टिः भवतीति। आकाशवाण्या सह वार्तालापं कुर्वन् ऋतुविज्ञानविभागस्य वरिष्ठः वैज्ञानिकः- आर. के. जेनामणिः अवदत् यत् अद्य कोङ्कण, गोवा, मध्यमहाराष्ट्र, पूर्वीराजस्थान, कर्नाटकराज्येषु अत्यन्तं प्रचण्डवृष्टिः भवतीति रक्त-वर्णियसंचेतना प्रकटिता वर्तते।

-----------------------------------------

<u>उत्तराखण्ड-चारधाम यात्रा</u>:

उत्तराखण्डे अतिवृष्टिकारणेन चरुर्धाम-यात्रायाः मार्गेण सह अनेके मार्गाः अवरुद्धाः सन्ति। गतरात्रौ सोनप्रयागस्य समीपे चत्वारिंशदधिकाः केदारनाथ-तीर्थयात्रिकाः अटन्ति स्म किन्तु राज्य-आपदुद्धार-बलेन ते सुरक्षितरूपेण निष्कासिताः।

-----------------------------------------

<u>जम्मू-कश्मीर-अमरनाथयात्रा:</u>

अद्य औपचारिकरूपेण समारब्धस्य अष्टत्रिंशत् दिवसीया वार्षिक श्रीअमरनाथजीयात्रा दक्षिणकश्मीरस्य अनन्तनागमण्डलस्य पहलगामात्, मध्यकश्मीरस्य गन्देर्बलमण्डलस्य बालटालात् च द्वयोः मार्गयोः सुचारुतया प्रचलति। यात्रीणां यात्रा सुदृढसुरक्षायाः मध्ये उभाभ्यां

मार्गाभ्यां प्रातःकालादेव आरब्धम् अस्ति । अद्य प्रातःकाले पहलगाममार्गे चन्दनवारीं प्रति त्रिसहस्रतोऽप्यधिकानां भक्तानां कृते अनुमतिः प्रलब्धा। बालटाल-गन्देर्बल-आधारशिबिरात् पवित्रगुहातीर्थं प्रति नवसहस्रतोऽप्यधिकानां तीर्थयात्रिणां अनुमतिः प्राप्ता। द्वयोः मार्गयोः सर्वविध-व्यवस्थासु, सुविधासु, सुरक्षितवातावरणेषु च यात्रिणः अतीव प्रसन्नाः, आनन्दयुताः, सन्तुष्टाः च दृश्यन्ते स्म। कश्मीरक्षेत्रस्य हिमालयस्य षड्पञ्चाशदधिक-सप्तशतोत्तर-द्वादशसहस्र-फीट्-परिमितम् यावत् उन्नतायां पवित्रगुहायां देशस्य लक्षशः भक्ताः अस्मिन् वर्षे प्रार्थनां करिष्यन्ति इति अपेक्षा अस्ति। अस्मिन्नेव क्रमे जम्मूनगरस्य भगवतीनगर-आधारशिबिरात् अद्य प्रातः अष्टत्रिंशोत्तर-द्विशत-वाहनेषु पुरुषान्, महिलाः, बालकान्, साधून् च समेत्य पञ्चसहस्रतोऽप्यधिकाः तीर्थयात्रिणः यात्रायै प्रस्थिताः। एते यात्रिणः अद्य सायंकालपर्यन्तं स्वस्व-आधारशिबिरेषु प्राप्नुयुः।

---

**क्रिकेट्-**

क्रिकेट्-क्रीडायां बर्मिन्घम्-नगरे एजबेस्टन् क्रीडाङ्गणे एण्डरसन्-तेंदुलकर-ट्रॉफीति टेस्ट क्रीडायाः द्वितीय-स्पर्धायाः द्वितीयदिने इङ्ग्लैण्ड-विरुद्धं प्रथम-चक्रे अन्तिमसूचनापर्यन्तं भारतेन षट्-स्तोभकानां हानि-पुरस्परं एकोनविंशत्यधिक-चतुःशत-धावनाङ्काः समार्जिताः ।

॥ इति वार्ता: ॥